# Dakshinakalika Sahasranama Stotram

# दक्षिणकालिकासहस्रनामस्तोत्रम्

## Document Information

Text title : Dakshinakalika Sahasranama Stotram

File name : dakShiNakAlikAsahasranAmastotram.itx

Category : devii, devI, sahasranAma, stotra

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shyAmArahasyam | chaturthaH parichChedaH || See corresponding sahasranAmAvalI.

Latest update : March 19, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2025

*sanskritdocuments.org*

# दक्षिणकालिकासहस्रनामस्तोत्रम्

(श्यामारहस्ये)
श्रीशिव उवाच ।
अस्य श्रदक्षिणकालिकासहस्रनामस्त्रोत्रस्य
महाकालभैरव ऋषिस्त्रिष्टुप्छन्दः
श्मशानकाली देवता धर्मार्थकाममोक्षार्थे विनियोगः ।
ॐ श्मशानकालिका काली भद्रकाली कपालिनी ।
गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥ १॥

कालिका कालरात्रिश्च महाकालनितम्बिनी ।
कालभैरवभार्य्या च कुलवर्त्मप्रकाशिनी ॥ २॥

कामदा कामिनी कन्या कमनीयस्वरूपिणी ।
कस्तूरीरसलिप्ताङ्गी कुञ्जरेश्वरगामिनी ॥ ३॥

ककारवर्णसर्वाङ्गी कामिनी कामसुन्दरी ।
कामार्त्ता कामरूपा च कामधेनुः कलावती ॥ ४॥

कान्ता कामस्वरूपा च कामाख्या कुलकामिनी ।
कुलीना कुलवत्यम्बा दुर्गा दुर्गतिनाशिनी ॥ ५॥

कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी ।
कृशाङ्गी कुलिशाङ्गी च क्रीङ्कारी कमला कला ॥ ६॥

करालास्या कराली च कुलकान्तापराजिता ।
उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महाबला ॥ ७॥

नीला घना मेघनादा मात्रा मुद्रा मितामिता ।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥ ८॥

माहेश्वरी च चामुण्डा वाराही नारसिंहिका ।
वज्राङ्गी वज्रकङ्काला नृमुण्डस्रग्विणी शिवा ॥ ९॥

मालिनी नरमुण्डाली गलद्रक्तविभूषणा ।
रक्तचन्दनसिक्ताङ्गी सिन्दूरारुणमस्तका ॥ १०॥

घोररूपा घोरदंष्ट्रा घोरा घोरतरा शुभा ।
महादंष्ट्रा महामाया सुदती युगदन्तुरा ॥ ११॥

सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना ।
शारदेन्दुप्रसन्नास्या स्फुरत्स्मेताम्बुजेक्षणा ॥ १२॥

अट्टहासा प्रफुल्लास्या स्मेरवक्त्रा सुभाषिणी ।
प्रफुल्लपद्मवदना स्मितास्या प्रियभाषिणी ॥ १३॥

कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी ।
सुमतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी ॥ १४॥

प्रचण्डा चण्डिका चण्डी चर्चिता चण्डवेगिनी ।
सुकेशी मुक्तकेशी च दीर्घकेशी महाकुचा ॥ १५॥

प्रेतदेहकर्णपूरा प्रेतपाणि सुमेखला ।
प्रेतासना प्रियप्रेता प्रेतभूमिकृतालया ॥ १६॥

श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता ।
पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी ॥ १७॥

पूता पवित्रा परमा परा पुण्यविभूषणा ।
पुण्यनाम्नी भीतिहरा वरदा खड्गपाशिनी ॥ १८॥

नृमुण्डहस्ता शान्ता च छिन्नमस्ता सुनासिका ।
दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी ॥ १९॥

दिगम्बरी घोररावा सृक्कान्तरक्तवाहिनी ।
घोररावा शिवासङ्गा निःसङ्गा मदनातुरा ॥ २०॥

मत्ता प्रमत्ता मदना सुधासिन्धुनिवासिनी ।
अतिमत्ता महामत्ता सर्वाकर्षणकारिणी ॥ २१॥

गीतप्रिया वाद्यरता प्रेतनृत्यपरायणा ।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥ २२॥

कात्यायनी जगन्माता जगतीपरमेश्वरी ।

जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी ॥ २३॥

जगज्जीववती हैमवती माया महालया ।
नागयज्ञोपवीताङ्गी नागिनी नागशायिनि ॥ २४॥

नागकन्या देवकन्या गान्धारी किन्नरी सुरी ।
मोहरात्री महारात्री दारुणाभा सुरासुरी ॥ २५॥

विद्याधरी वसुमती यक्षिणी योगिनी जरा ।
राक्षसी डाकिनी वेदमयी वेदविभूषणा ॥ २६॥

श्रुतिस्मृतिमहाविद्या गुह्यविद्यापुरातनी ।
चिन्तचिन्ता स्वधा स्वाहा निद्रा तन्द्रा च पार्वती ॥ २७॥

अर्पणा निश्चला लोला सर्वविद्यातपस्विनी ।
गङ्गा काशी शची सीता सती सत्यपरायणा ॥ २८॥

नीतिः सुनीतिः सुरुचिस्तुष्टिः पुष्टिधृतिः क्षमा ।
वाणी बुद्धिर्महालक्ष्मीर्लक्ष्मीर्नीलसरस्वती ॥ २९॥

स्रोतस्वती स्रोतवती मातङ्गी विजया जया ।
नदी सिन्धुः सर्वमयि तारा शून्यनिवासिनी ॥ ३०॥

शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी ।
सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी ॥ ३१॥

सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभाविनी ।
रङ्किणी टङ्किनी चित्रा विचित्रा चित्ररूपिणी ॥ ३२॥

पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ॥ ३३॥

शाकिनी हाकिनी क्षान्ता राकिणी रुधिरप्रिया ।
भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी ॥ ३४॥

उपेन्द्राणी महेशानी ज्योत्स्ना चेन्द्रस्वरूपिणी ।
सूर्य्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् ॥ ३५॥

शक्तिः सूक्तिर्मतिर्मती भुक्तिर्मुक्तिः पतिव्रता ।
सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा ॥ ३६॥

सर्वज्ञा सिद्धिदा सिद्धा भाव्या भव्या भयापहा ।

कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया ॥ ३७॥

तमिस्रा यामिनीस्था च स्थिरां धीरा तपस्विनी ।
चार्वङ्गी चञ्चला लोलजिह्वा चारुचरित्रिणी ॥ ३८॥

त्रपा त्रपावती लज्जा निर्लज्जा ह्रीं रजोवती ।
सत्त्ववती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी ॥ ३९॥

गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा ।
भीमा भयानका भीमनादिनी भीः प्रभावती ॥ ४०॥

वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया ।
ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा ॥ ४१॥

कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा ।
वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी ॥ ४२॥

मधुमती कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मिता ।
रम्भोर्वशी रती रामा रोहिणी रेवती रमा ॥ ४३॥

शङ्खिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ।
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ॥ ४४॥

पिनाकधारिणी धूम्रा शरभी वनमालिनी ।
वज्रिणी समरप्रीता वेगिनी रणपण्डिता ॥ ४५॥

जटिनी बिम्बिनी नीला लावण्याम्बुधिचन्द्रिका ।
बलिप्रिया सदापूज्या पूर्णा दैत्येन्द्रमाथिनी ॥ ४६॥

महिषासुरसंहन्त्री वासिनी रक्तदन्तिका ।
रक्तपा रुधिराक्ताङ्गी रक्तखर्परहस्तिनी ॥ ४७॥

रक्तप्रिया मांसरुचिरा सवासक्तमानसा ।
गलच्छोणितमुण्डालिकण्ठमालाविभूषणा ॥ ४८॥

शवासना चितान्तस्था माहेशी (महिषी)वृषवाहिनी ।
व्याघ्रत्वगम्बरा चीनचेलिनी सिंहवाहिनी ॥ ४९॥

वामदेवी महादेवी गौरी सर्वज्ञभाविनी ।
बालिका तरुणी वृद्धा वृद्धमाता जरातुरा ॥ ५०॥

सुभ्रुर्विलासिनी (शुभ्रविलासिनी)ब्रह्मवादिनी ब्राह्मणी मही ।
स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी ॥ ५१॥

अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनुवादिनी ।
मन्दाकिनी मन्दहासा ज्वालामुख्यसुरान्तका ॥ ५२॥

मानदा मानिनी मान्या माननीया मदोद्धता ।
मदिरा मदिरोन्मादा मेध्या नव्या प्रसादिनी ॥ ५३॥

सुमध्यानन्तगुणिनी सर्वलोकोत्तमोत्तमा ।
जयदा जित्वरा जेत्री जयश्रीर्जयशालिनी ॥ ५४॥

सुखदा शुभदा सत्या सभासङ्क्षोभकारिणी ।
शिवदूती भूतिमती विभूतिर्भीषणानना ॥ ५५॥

कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ।
कीर्त्तिर्यशस्विनी भूषा भूष्या भूतपतिप्रिया ॥ ५६॥

सगुणा निर्गुणा धृष्टा निष्ठा काष्ठा प्रतिष्ठिता ।
धनिष्ठा धनदा धन्या वसुधा स्वप्रकाशिनी ॥ ५७॥

उर्वी गुर्वी गुरुश्रेष्ठा सगुणा त्रिगुणात्मिका ।
महाकुलीना निष्कामा सकामा कामजीवना ॥ ५८॥

कामदेवकला रामाभिरामा शिवनर्त्तकी ।
चिन्तामणिकल्पलता जाग्रती दीनवत्सला ॥ ५९॥

कार्त्तिकी कीर्त्तिका कृत्या अयोध्या विषमा समा ।
सुमन्त्रा मन्त्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी ॥ ६०॥

त्रैलोक्यजननी हृष्टा निर्मांसा मनोरूपिणी ।
तडागनिम्नजठरा शुष्कमांसास्थिमालिनी ॥ ६१॥

अवन्ती मथुरा माया त्रैलोक्यपावनीश्वरी ।
व्यक्ताव्यक्तानेकमूर्त्तिः शर्वरी भीमनादिनी ॥ ६२॥

क्षेमङ्करी शङ्करी च सर्वसम्मोहकारिणी ।
ऊर्द्ध्वतेजस्विनी क्लिन्ना महातेजस्विनी तथा ॥ ६३॥

अद्वैता भोगिनी पूज्या युवती सर्वमङ्गला ।
सर्वप्रियङ्करी भोग्या धरणी पिशिताशना ॥ ६४॥

भयङ्करी पापहरा निष्कलङ्का वशङ्करी ।
आशा तृष्णा चन्द्रकला निद्रान्या वायुवेगिनी ॥ ६५॥

सहस्रसूर्य्यसङ्काशा चन्द्रकोटिसमप्रभा ।
वह्निमण्डलसंस्था च सर्वतत्त्वप्रतिष्ठिता ॥ ६६॥

सर्वाचारवती सर्वदेवकन्याधिदेवता ।
दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिका ॥ ६७॥

इज्या पूज्या विभीर्भूतिः सत्कीर्त्तिर्ब्रह्मरूपिणी ।
रम्भोरुश्चतुरा राका जयन्ती करुणा कुहुः ॥ ६८॥

मनस्विनी देवमाता यशस्या ब्रह्मचारिणी ।
ऋद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥ ६९॥

आधाररूपिणी ध्येया मूलाधारनिवासिनी ।
आज्ञा प्रज्ञापूर्णमनाश्चन्द्रमुख्यनुकूलिनी ॥ ७०॥

वावदूका निम्ननाभिः सत्या सन्ध्या दृढव्रता ।
आन्वीक्षिकी दण्डनीतिस्त्रयी त्रिदिवसुन्दरी ॥ ७१॥

ज्वलिनी ज्वालिनी शैलतनया विन्ध्यवासिनी ।
अमेया खेचरी धैर्य्या तुरीया विमलातुरा ॥ ७२॥

प्रगल्भा वारुणीच्छाया शशिनी विस्फुलिङ्गिनी ।
भुक्तिः सिद्धिः सदाप्राप्तिः प्राकाम्या महिमाणिमा ॥ ७३॥

इच्छासिद्धिर्विसिद्धा च वशित्वोर्द्ध्वनिवासिनी ।
लघिमा चैव गायत्री सावित्री भुवनेश्वरी ॥ ७४॥

मनोहरा चिता दिव्या देव्युदारा मनोरमा ।
पिङ्गला कपिला जिह्वा रसज्ञा रसिका रसा ॥ ७५॥

सुषुम्नेडा भोगवती गान्धारी नरकान्तका ।
पाञ्चाली रुक्मिणी राधाराध्या भीमाधिराधिका ॥ ७६॥

अमृता तुलसी वृन्दा कैटभी कपटेश्वरी ।
उग्रचण्डेश्वरी वीरा जननी वीरसुन्दरी ॥ ७७॥

उग्रतारा यशोदाख्या दैवकी देवमानिता ।

निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका ॥ ७८॥

कुलवागीश्वरी वाणी मातृका द्राविणी द्रवा ।
योगेश्वरी महामारी भ्रामरी बिन्दुरूपिणी ॥ ७९॥

दूती प्राणेश्वरी गुप्ता बहुला चामरी प्रभा ।
कुञ्जि(ब्जि)का ज्ञानिनी ज्येष्ठा भुशुण्डी प्रकटातिथिः ॥ ८०॥

द्रविणी गोपनी माया कामबीजेश्वरी क्रिया ।
शाम्भवी केकरा मेना मूसलास्त्रा तिलोत्तमा ॥ ८१॥

अमेयविक्रमा क्रूरा सम्पत्शाला त्रिलोचना ।
सुस्थी हव्यवहा प्रीतिरुष्मा धूम्रार्चिरङ्गदा ॥ ८२॥

तपिनी तापिनी विश्वा भोगदा धारिणी धरा ।
त्रिखण्डा बोधिनी वश्या सकला शब्दरूपिणी ॥ ८३॥

बीजरूपा महामुद्रा योगिनी योनिरूपिणी ।
अनङ्गकुसुमानङ्गमेखलानङ्गरूपिणी ॥ ८७॥

वज्रेश्वरी च जयिनी सर्वद्वन्द्वक्षयङ्करी ।
षडङ्गयुवती योगयुक्ता ज्वालांशुमालिनी ॥ ८८॥

दुराशया दुराधारा दुर्जया दुर्गरूपिणी ।
दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ॥ ८९॥

हंसेश्वरी त्रिकोणस्था शाकम्भर्य्यनुकम्पिनी ।
त्रिकोणनिलया नित्या परमामृतरञ्जिता ॥ ९०॥

महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ।
त्वरिता भक्तिसंसक्ता भक्तवश्या सनातनी ॥ ९१॥

भक्तानन्दमयी भक्तभाविका भक्तशङ्करी ।
सर्वसौन्दर्य्यनिलया सर्वसौभाग्यशालिनी ॥ ९२॥

सर्वसम्भोगभवना सर्वसौख्यनिरूपिणी ।
कुमारीपूजनरता कुमारीव्रतचारिणी ॥ ९३॥

कुमारीभक्तिसुखिनी कुमारीरूपधारिणी ।
कुमारीपूजकप्रीता कुमारीप्रीतिदा प्रिया ॥ ९४॥

कुमारीसेवकासङ्गा कुमारीसेवकालया ।
आनन्दभैरवी बाला भैरवी वटुभैरवी ॥ ९५॥

श्मशानभैरवी कालभैरवी पुरभैरवी ।
महाभैरवपत्नी च परमानन्दभैरवी ॥ ९६॥

सुधानन्दभैरवी च उन्मादानन्दभैरवी ।
मुक्तानन्दभैरवी च तथा तरुणभैरवी ॥ ९७॥

ज्ञानानन्दभैरवी च अमृतानन्दभैरवी ।
महाभयङ्करी तीव्रा तीव्रवेगा तपस्विनी ॥ ९८॥

त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी ।
त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी ॥ ९९॥

महासप्तदशी चैव षोडशी त्रिपुरेश्वरी ।
महाङ्कुशस्वरूपा च महाचक्रेश्वरी तथा ॥ १००॥

नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ।
राजराजेश्वरी धीरा महात्रिपुरसुन्दरी ॥ १०१॥

सिन्दूरपूररुचिरा श्रीमत्त्रिपुरसुन्दरी ।
सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोत्तरीयिणी ॥ १०२॥

जवायावकसिन्दूररक्तचन्दनधारिणी ।
जवायावकसिन्दूररक्तचन्दनरूपधृक् ॥ १०३॥

चामरीबालकुटिलनिर्मलश्यामकेशिनी ।
वज्रमौक्तिकरत्नाढ्यकिरीटमुकुटोज्ज्वला ॥ १०४॥

रत्नकुण्डलसंसक्तस्फुरद्गण्डमनोरमा ।
कुञ्जरेश्वरकुम्भोत्थमुक्तारञ्जितनासिका ॥ १०५॥

मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डला ।
सूर्य्यकान्तेन्दुकान्ताढ्यस्पर्शाश्मकण्ठभूषणा ॥ १०६॥

बीजपूरस्फुरद्बीजदन्तपङ्क्तिरनुत्तमा ।
कामकोदण्डकाभुग्नभ्रूकटाक्षप्रवर्षिणी ॥ १०७॥

मातङ्गकुम्भवक्षोजा लसत्कोकनदेक्षणा ।
मनोज्ञशष्कुलीकर्णा हंसीगतिविडम्बिनी ॥ १०८॥

पद्मरागाङ्गदज्योतिर्दोश्चतुष्कप्रकाशिनी ।
नानामणिपरिस्फूर्जच्छुद्धकाञ्चनकङ्कना ॥ १०९॥

नागेन्द्रदन्तनिर्माणवलयाङ्कितपाणिनी ।
अङ्गुरीयकचित्राङ्गी विचित्रक्षुद्रघण्टिका ॥ ११०॥

पट्टाम्बरपरीधाना कलमञ्जीरशिञ्जिनी ।
कर्पूरागुरुकस्तूरीकुङ्कमद्रवलेपिता ॥ १११॥

विचित्ररत्नपृथिवीकल्पशाखितलस्थिता ।
रत्नद्वीपस्फुरद्रक्तसिंहासनविलासिनी ॥ ११२॥

षड्चक्रभेदनकरी परमानन्दरूपिणी ।
सहस्रदलपद्मान्तश्चन्द्रमण्डलवर्त्तिनी ॥ ११३॥

ब्रह्मरूपशिवक्रोडनानासुखविलासिनी ।
हरविष्णुविरिञ्चीन्द्रग्रहनायकसेविता ॥ ११४॥

शिवा शैवा च रुद्राणी तथैव शिववादिनी ।
मातङ्गिनी श्रीमती च तथैवानन्दमेखला ॥ ११५॥

डाकिनी योगिनी चैव तथोपयोगिनी मता ।
माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ॥ ११६॥

अलम्बुषा वेगवती क्रोधरूपा सुमेखला ।
गान्धारी हस्तिजिह्वा च ईडा चैव शुभङ्करी ॥ ११७॥

पिङ्गला ब्रह्मदूती च सुषुम्ना चैव गन्धिनी ।
आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा ॥ ११८॥

भगरूपा भगस्थात्री भगिनी भगरूपिणी ।
भगात्मिका भगाधाररूपिणी भगमालिनी ॥ ११९॥

लिङ्गाख्या चैव लिङ्गेशी त्रिपुराभैरवी तथा ।
लिङ्गगीतिः सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक् ॥ १२०॥

लिङ्गमाना लिङ्गभवा लिङ्गलिङ्गा च पार्वती ।
भगवती कौशिकी च प्रेमा चैव प्रियंवदा ॥ १२१॥

गृध्ररूपा शिवारूपा चक्रिणी चक्ररूपधृक् ।

लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्गनिवासिनी ॥ १२२॥

लिङ्गस्था लिङ्गिनी लिङ्गरूपिणी लिङ्गसुन्दरी ।
लिङ्गगीतिर्महाप्रीता भगगीतिर्महासुखा ॥ १२३॥

लिङ्गनामसदानन्दा भगनामसदागतिः ।
लिङ्गमालाकण्ठभूषा भगमालाविभूषणा ॥ १२४॥

भगलिङ्गामृतप्रीता भगलिङ्गामृतात्मिका ।
भगलिङ्गार्चनप्रीता भगलिङ्गस्वरूपिणी ॥ १२५॥

भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा ॥ १२६॥

स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमार्चिता ।
स्वयम्भूकुसुमप्राणा स्वयम्भूकुसुमोत्थिता ।
स्वयम्भूकुसुमस्नाता स्वयम्भूपुष्पतर्पिता ॥ १२७॥

स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी ।
स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पचर्चिता ॥ १२८॥

स्वयम्भूपुष्पनिरता स्वयम्भूकुसुमग्रहा ।
स्वयम्भूपुष्पयज्ञांशा स्वयम्भूकुसुमात्मिका ॥ १२९॥

स्वयम्भूपुष्पनिचिता स्वयम्भूकुसुमप्रिया ।
स्वयम्भूकुसुमादानलालसोन्मत्तमानसा ॥ १३०॥

स्वयम्भूकुसुमानन्दलहरीस्निग्धदेहिनी ।
स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला ॥ १३१॥

स्वयम्भूपुष्पनिलया स्वयम्भूपुष्पवासिनी ।
स्वयम्भूकुसुमस्निग्धा स्वयम्भूकुसुमात्मिका ॥ १३२॥

स्वयम्भूपुष्पकरिणी स्वयम्भूपुष्पपाणिका ।
स्वयम्भूकुसुमध्याना स्वयम्भूकुसुमप्रभा ॥ १३३॥

स्वयम्भूकुसुमज्ञाना स्वयम्भूपुष्पभोगिनी ।
स्वयम्भूकुसुमोल्लासा स्वयम्भूपुष्पवर्षिणी ॥ १३४॥

स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्परूपिणी ।
स्वयम्भूकुसुमोन्मादा स्वयम्भूपुष्पसुन्दरी ॥ १३५॥

स्वयम्भूकुसुमाराध्या स्वयम्भूकुसुमोद्भवा ।
स्वयम्भूकुसुमव्यग्रा स्वयम्भूपुष्पपूर्णिता ॥ १३६॥

स्वयम्भूपूजकप्रज्ञा स्वयम्भूहोतृमातृका ।
स्वयम्भूदातृरक्षित्री स्वयम्भूरक्ततारिका ॥ १३७॥

स्वयम्भूपूजकग्रस्ता स्वयम्भूपूजकप्रिया ।
स्वयम्भूवन्दकाधारा स्वयम्भूनिन्दकान्तका ॥ १३८॥

स्वयम्भूप्रदसर्वस्वा स्वयम्भूप्रदपुत्त्रिणी ।
स्वयम्भूप्रदसस्मेरा स्वयम्भूप्रदशरीरिणी ।
सर्वकालोद्भवप्रीता सर्वकालोद्भवात्मिका ॥ १३९॥

सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा ।
कुण्डपुष्पसदाप्रीतिर्गोलपुष्पसदारतिः ॥ १४०॥

कुण्डगोलोद्भवप्राणा कुण्डगोलोद्भवात्मिका ।
स्वयम्भु(भू?)वा शिवा धात्री पावनी लोकपावनी ॥ १४१॥

कीर्त्तिर्यशस्विनी मेधा विमेधा शक्रसुन्दरी ।
अश्विनी कृत्तिका पुष्या तेजस्का चन्द्रमण्डला ।
सूक्ष्मासूक्ष्मा वलाका च वरदा भयनाशिनी ॥ १४२॥

वरदा भयदा चैव मुक्तिबन्धविनाशिनी ।
कामुका कामदा कान्ता कामाख्या कुलसुन्दरी ॥ १४३॥

दुःखदा सुखदा मोक्षा मोक्षदार्थप्रकाशिनी ।
दुष्टादुष्टमतिश्चैव सर्वकार्य्यविनाशिनी ॥ १४४॥

शुक्राधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी ।
शुक्रालया शुक्रभोगा शुक्रपूजासदारतिः ॥ १४५॥

शुक्रपूज्या शुक्रहोमसन्तुष्टा शुक्रवत्सला ।
शक्रमूर्त्तिः शुक्रदेहा शुक्रपूजकपुत्त्रिणी ॥ १४६॥

शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी ।
शुक्रस्नाता शुक्रकरी शुक्रसेव्यातिशुक्रिणी ॥ १४७॥

महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी ।
शुक्राभिधेया शुक्रार्हा शुक्रवन्दकवन्दिता ॥ १४८॥

शुक्रानन्दकरी शुक्रसदानन्दाभिधायिका ।
शुक्रोत्सवा सदाशुक्रपूर्णा शुक्रमनोरमा ॥ १४९॥

शुक्रपूजकसर्वस्वा शुक्रनिन्दकनाशिनी ।
शुक्रात्मिका शुक्रसम्पत् शुक्राकर्षणकारिणी ॥ १५०॥

शारदा साधकप्राणा साधकासक्तमानसा ।
साधकोत्तमसर्वस्वा साधकाभक्तरक्तपा ॥ १५१॥

साधकानन्दसन्तोषा साधकानन्दकारिणी ।
आत्मविद्या ब्रह्मविद्या परब्रह्मस्वरूपिणी ॥ १५२॥

त्रिकूटस्था पञ्चकूटा सर्वकूटशरीरिणी ।
सर्ववर्णमयी वर्णजय(प)मालाविधायिनी ॥ १५३॥

इति श्यामारहस्ये शिवभाषितं दक्षिणकालिकासहस्रनामस्तोत्रं सम्पूर्णम् ।

- ॥ श्यामारहस्यम् । चतुर्थः परिच्छेदः ॥

- .. shyAmArahasyam . chaturthaH parichChedaH ..

Notes:

The Namavali derived from this Stotram can be
accessed from one of the links given below.

Encoded and proofread by Ruma Dewan

*Dakshinakalika Sahasranama Stotram*

pdf was typeset on March 19, 2025

Please send corrections to *sanskrit@cheerful.com*